International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(2): 304-305
© 2023 IJSR
www.anantaajournal.com
Received: 26-01-2023
Accepted: 28-02-2023

**डॉ. लक्ष्मीनारायणबेहेरा**
सहायकाचार्यः, शिक्षा शास्त्र विभागः,
श्री जगन्नाशसंस्कृत विश्वविद्यालयः,
पुरी, ओडिशा, भारत

**Corresponding Author:**
**डॉ. लक्ष्मीनारायणबेहेरा**
सहायकाचार्यः, शिक्षा शास्त्र विभागः,
श्री जगन्नाशसंस्कृत विश्वविद्यालयः,
पुरी, ओडिशा, भारत

# सन्देहपरिकरालङ्कारयोः शिक्षाशास्त्रीयमध्ययनम्

**डॉ. लक्ष्मीनारायणबेहेरा**

**सारांश**
संस्कृतकाव्यशास्त्रजगति विद्यमानानाम् अलङ्काराणां अध्ययनावसरे ज्ञातं यत् सन्देहपरिकरयोः शिक्षाशास्त्रीयमहत्त्वमपि वर्त्तते। शिक्षामनोविज्ञान–विषयानुगुणः वर्त्तते सन्देहालङ्कारः। एषः तु मानसिकविक्रियायाः अवस्थामभि–व्यनक्ति। पुनश्च विशेष्यविशेषणज्ञानमूलकः परिकरालङ्कारः शिक्षाशास्त्रीयविधेः प्रतिनिधित्वं विदधाति इति प्रतीयते। संस्कृतकाव्यशास्त्रपरम्परायाम् अन्त–र्निहितानां शैक्षिकतत्वानामाविष्करणसन्दर्भितमिदं शोधकार्यम्।

**कूटशब्दः** सन्देहालङ्कारः, परिकरालङ्कारः, शिक्षणविधयः, शिक्षामनो–विज्ञानम्

## प्रस्तावना

### मानसिकविक्रियायाः प्रतिदर्शः सन्देहालङ्कारः

व्यावहाराध्ययनात्मकं शास्त्रं मनोविज्ञानम्। तत्रापि शैक्षिकपरिस्थितौ व्यवहृतं मनोविज्ञानं शिक्षामनोविज्ञानमिति। अधिगमसन्दर्भे भावपरिस्फुटन–वेलायां च कदाचित् अध्येता सन्देहाग्रस्तः भवति। अधिगमप्रक्रियायां सन्दहस्तु प्रतिबन्धक–रूपेणात्मप्रकाशनं करोति। निश्चयात्मकं सुदृढम् असन्दिग्धं च ज्ञानं मानसिक–बौद्धिकोन्नयने सहायकं वर्त्तते। तद्विपरीतं च सन्देहास्पदं ज्ञानम् अधिगमस्य पूर्णतायै प्रतिबन्धकं भवति। आङ्ग्लोभाषायां व्यवहृतं doubt इति पदमेव संस्कृते 'सन्देहः' इति प्रयुज्यते। सन्देहसन्दर्भे प्रसिद्धिशिक्षाशास्त्रिणा H-R-Bhatia महोदयेन प्रोक्तं यत्–

> 'If you have doubt or doubts about something, you feel uncertain about it and do not know whether it is true or possible. If you say no doubt about it, you mean that you are certain it is true.'[1]

पुनश्च–B-N-Jha महोदयेनोक्तम्–

> '…..not being certain about something, especially about how good or true it is.'[2]

एतत्सर्वमनुशीलनेन स्पष्टं यत् सन्देहं विनैव सत्यतायाः वास्तविकज्ञानस्य प्राप्तिर्भवति। संस्कृतकाव्यशास्त्रे 'सन्देहः' इति कश्चन अलङ्कारविशेषः। अलङ्कारविवेचनप्रसङ्गे शिक्षाशास्त्रीयसिद्धान्तानुकूलाः सन्देहस्य परिभाषाः अलङ्कारलक्षणरूपेण परिदृश्यन्ते। यथा–

> 'सन्देहः प्रकृतेऽन्यस्य संशयः प्रतिभोत्थितः।[3]

अर्थात् प्रकृते वास्तविके वा वस्तुनि अप्रकृतस्य अवास्तवस्य वा प्रतिभानं भवति चेत् सन्देहालङ्कारः। तस्य सन्देहालङ्कारस्य भागत्रयमपि विश्वनाथादिभिः निर्द्धारितम्। एते विभागास्तु मनोवैज्ञानिकसिद्धान्तानुकूलाः भवन्ति। यथोक्तम्–

> 'शुद्धो निश्चयगर्भोऽसौ निश्चयान्त इति त्रिधा।[4]

---
[1] H.R. Vatia, Elements of Educational Psychology.
[2] B.N. Jha, Modern Educational Psychology.
[3] सा. द. दशमपरिच्छेदः, का. -३५
[4] सा. द. दशमपरिच्छेदः, का. -३८

अर्थात् शुद्धसन्देहः, निश्चयगर्भसन्देहः, निश्चयान्तसन्देहः चेति त्रिविध–सन्देहालङ्कारः।
अलङ्कारसन्दर्भे तु साहित्यिकविचाराः काव्यशास्त्रदृष्टिकोणानुसारं विश्लिष्टाः। मनोविज्ञानदृष्ट्यापि एते विभागाः सन्देहास्पदमनोदशां प्रतिपादयन्ति। तेषां विश्लेषणं काव्यशास्त्रदृष्ट्या इत्थमस्ति–

**i) शुद्धसन्देहः यत्र संशयः एव पर्यवसानम्**[5]
अर्थात् यत्र संशयः आदितः अन्तं यावत् तिष्ठति, तत्सुद्धसन्देहः।

**ii) निश्चयगर्भसन्देहः यत्रादावन्ते च संशयः, मध्ये निश्चयः सः निश्चयगर्भसन्देहः।**[6]
अर्थात् आदौ अन्ते च सन्देहः, मध्ये निस्सन्देहः भवति चेत् निश्चयगर्भसन्देहः।

**iii) निश्चयान्तः यत्रादौ सन्देहः अन्ते च निश्चयः स निश्चयान्तः।**[7]
अर्थात् यदि आदौ सन्देहः भवति पश्चात् च सन्देहः दूरीभूतः भवति तत्र निश्चयान्तसन्देहालङ्कारः।
पाश्चात्य–शिक्षाशास्त्रीणः सन्देहस्य विभागीकरणं चतुर्धा कुर्वन्ति। यथा–
1. Doubt as lack of faith.
2. Doubt as double mildness.
3. Doubt as hard scepticism.

अनुसन्धानेन ज्ञातं यत् पाश्चात्यानां सन्देहस्य विभाजनं काव्यशास्त्रीयसन्देहविभाजनात् भिन्नं वर्त्तते। उभयोः दृष्टिः भिन्ना। परन्तु उभयत्र विभागीकरणं मनस्तात्त्विकदृष्ट्या एव सम्भवत्। काव्यशास्त्रे यद्यपि अलङ्काररूपेण सन्देहस्य स्वीकारः भवति तथापि मनोविश्लेषणमत्रापि कृतमस्ति। लोकव्यावहारे विविधावसरे यथा सन्देहस्योद्रेकः भवति, तदनुसृत्यैव शुद्ध–निश्चयगर्भनिश्चयान्तश्चेति विभाजनं काव्यशास्त्रैः कृतम्।
छात्राणां समस्यासमाधानं तु अधुनातनकाले अध्यापकाः मनोवैज्ञानिक–विध्यनुसारमेव कुर्वन्ति। शङ्का–सन्देह–भ्रान्त्यादयः नकारात्मकमनोदशाः छात्रेषु नितरां दृश्यन्ते। एतावत्पर्यन्तम् सर्वेऽपि शिक्षाविदः पाश्चात्यमनोविज्ञानस्यैव अनुगामिनः दृश्यन्ते। यदि भारतीयशास्त्रेषु विद्यमानानां शिक्षाशास्त्रीयतत्त्वानाम् अध्ययनं विधाय तदनुरूपमाचरणं करिष्यते तर्हि भारतीय शिक्षा मनोविज्ञानस्य सद्भावं सर्वे अनुभविष्यन्ति महत्त्वं च प्रकटितं भविष्यति। सन्देहालङ्कारः न केवल मलङ्कारमात्रम्, अपि च मनोवैज्ञानिकविचाराः अपि तत्र समाविष्टाः सन्ति। छात्राणां संशयात्मिका मनोदशा अपि सन्देहालङ्कारतत्त्वमेवानुसरति। अतः अध्यापकाः छात्राणां सन्दहाकुलितमनोदशायाः अध्ययनं काव्यशास्त्रदृष्ट्या अपि कर्त्तुमर्हन्ति।

**विशेष्य–विशेषणज्ञानपूरकः परिकरालङ्कारः**
संस्कृतभाषाशिक्षणे व्याकरणशिक्षणस्य आवश्यकता सर्वादौ अस्माभिः अङ्गीक्रियते। व्याकरणशिक्षणे शब्दरूपधातुरूप–पदपरिचय–सन्धि–समासादीनां महत्त्वमस्माभिः अङ्गीक्रियते। पदपरिचयप्रसङ्गे विशेष्यविशेषणचर्चा अस्माभिः विधीयते। प्रायतः छात्रेषु संस्कृतव्याकरणं प्रति वैरस्यता परिलक्ष्यते। तादृशानां छात्राणां हृदि रूचेर्जागरणार्थम् अधुनातनशिक्षाविदः विविधान् उपायान् समवलम्बन्ते। अनुसन्धानेन स्पष्टं यत् संस्कृतव्याकरणशिक्षणं साहित्यिकशैल्या क्रियते चेत् सरसता समुत्पद्यते वैरस्यता च विनश्यति। विविधेषु अलङ्कारेषु विद्यमानानां शैक्षिकतत्त्वानां अनुसन्धानावसरे परिदृष्टं यत् परिकरालङ्कारे तादृशः कश्चन व्याकरणशिक्षणोपायः सन्निविष्टः। तदत्रालोच्यते।
परिकरा–लङ्कारस्य लक्षणमित्थमस्ति–
i) उक्तैर्विशेषणैः साभिप्रायैः परिकरो मतः।[8]
ii) विशेषणैर्यत्साकूतैरुक्तिः परिकरस्तु सः।[9]

कस्यचन विशेष्यपदस्य कृते अभिप्राययुक्तानि प्रसङ्गभूतानि वा बहूनि विशेषणपदानि एकत्र सन्निवेशितानि भवन्ति चेत् परिकरालङ्कारः। अर्थात् एकस्य विशेषणस्य बहूनि विशेषणान्यत्र भवन्ति। यथोदाहरणं–

''अङ्गराज! सेनापते! द्रोणापहासिन्! कर्ण!
रक्षैनं भीमाद् दुःशासनम्।।''[10]

अत्र 'कर्ण!' विशेष्यः, 'अङ्गराज!' 'सेनापते'! 'द्रोणापहासिन्'! इत्येतानि विशेषणानि।
भाषाधिगमे विशेष्यविशेषणज्ञानं सौलभ्येन सम्प्राप्तुं एतादृशानामुदा–हरणानामावश्यकता वर्त्तते। एतेन छात्राः प्रसङ्गभित्तिकानि विशेष्यविशेषण–पदानि चेतुं अवगन्तुं च सक्षमाः भविष्यन्ति। कस्यचन कथाप्रसङ्गस्य उपस्थितौ छात्रैषु रूचिशीलता अपि स्वतः समागच्छति।
अन्योदाहरणं यथा–

महौजसो मानना धनार्चिता
धनुर्भृतः संयति लब्धकीर्तयः।
न सहंतास्तस्य न भेदवृत्तयः
प्रियाणि वाञ्छन्त्यसुभिः समीहितुम्।[11]

अत्र दुर्योधनस्य (विशेष्यस्य) कृते महौजसः, मानधना, धनार्चिता, धनर्भृतः, लब्धकीर्तयः इत्येतानि विशेषणानि वर्णितानि।
सर्वोपरि वक्तुं शक्यते यत् विशेष्यविशेषणाध्यापनप्रसङ्गे अध्यापकः परिकरालङ्काराश्रितानि उदाहरणानि प्रस्तूय अवबोधनकार्यं सारल्येन सम्पादयितुं शक्नोति।

**सन्दर्भग्रन्था**

1. काव्यविच्छित्तिमीमांसा, जयमन्तमिश्रः, राष्ट्रियसंस्कृतसंस्थानम्, नई दिल्ली, १९९८
2. काव्यप्रकाशः, व्याख्याकारः, पं रघुनाथप्रसादचतुर्वेदी, चौखम्बासंस्कृतसंस्थानम्, वाराणसी, २००३
3. ध्वन्यालोकः, आनन्दवर्धनः (व्याख्याकारः जगन्नाथपाठकः) चौखम्बाविद्याभवनम्, वाराणसी, तृतीयसंस्करणम्, १९८८
4. साहित्यदर्पणः व्याख्याकारः शेषराजशर्मा रेश्मी, चन्द्रकलाटीका, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी–१९९४
5. शिक्षामनोविज्ञानम्, पी.डी.पाठकः विनोदपुस्तकमन्दिरम्, आगरा–२, १९९८


[5] सा. द. वृत्तिः
[6] सा. द. वृत्तिः
[7] सा. द. वृत्तिः
[8] सा. द. परि. का. -५७
[9] का. प्र. का. -५९
[10] वेणीसंहारनाटकम्
[11] किरातार्जुनीयम्-प्रथमसर्गः